# कः रक्षति कः रक्षितः

**प्रश्नः 1. उच्चारणं कुरुत–**(उच्चारण कीजिए–)

| | | | | |
|---|---|---|---|---|
| पञ्चाशत् | षष्टिः | सप्ततिः | अशीतिः | नवतिः |
| त्रिपञ्चाशत् | द्वाषष्टिः | चतुस्सप्ततिः | द्वयशीतिः | त्रिनवतिः |
| पञ्चपञ्चाशत् | चतुष्षष्टिः | पञ्चसप्ततिः | चतुरशीतिः | पञ्चनवतिः |
| सप्तपञ्चाशत् | पञ्चषष्टिः | सप्तसप्ततिः | पञ्चाशीतिः | षण्णवतिः |
| अष्टापञ्चाशत् | नवषष्टिः | अष्टासप्ततिः | नवाशीतिः | शतम् |

**उत्तरम्–** छात्रः स्वयमेव उच्चारणं करिष्यति।

**प्रश्नः 2. अधोलिखितेषु पदेषु प्रयुक्तां विभक्तिं वचनं च लिखत–**(निम्नलिखित पदों में प्रयुक्त विभक्ति और वचन लिखिए–)

| | पदानि | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा– | भ्रमणाय | चतुर्थी | एकवचनम् |
| | वस्तूनि | ...................... | ...................... |
| | प्लास्टिकेन | ...................... | ...................... |
| | विकीर्णानि | ...................... | ...................... |
| | मसियष्ट्या | ...................... | ...................... |
| | स्यूतकेषु | ...................... | ...................... |
| | काष्ठपीठे | ...................... | ...................... |
| | पृथिव्याम् | ...................... | ...................... |

**उत्तरम्–**

| पदानि | विभक्तिः | वचनम् |
|---|---|---|
| वस्तूनि | प्रथमा/द्वितीया | बहुवचनम् |
| प्लास्टिकेन | तृतीया | एकवचनम् |
| विकीर्णानि | प्रथमा/द्वितीया | बहुवचनम् |
| मसियष्ट्या | तृतीया | एकवचनम् |
| स्यूतकेषु | सप्तमी | बहुवचनम् |
| काष्ठपीठे | सप्तमी | एकवचनम् |
| पृथिव्याम् | सप्तमी | एकवचनम् |

**प्रश्नः 3. एकपदेन उत्तरत–**(एक पद में उत्तर दीजिए–)

(क) मसियष्टी–जलकूपी–प्रभृतीनि वस्तूनि केन पदार्थेन निर्मितानि?

(ख) उपवनस्य द्वारे कानि क्षिप्तानि सन्ति?

(ग) मृत्तिकायां किं वस्तु न कदापि विनश्यति?

(घ) अस्माकं प्रयासः कस्य रक्षणे अपेक्षितः?

**उत्तरम्–** (क) प्लास्टिकेन, (ख) प्लास्टिकस्यूतकानि, (ग) प्लास्टिकम्, (घ) पर्यावरणस्य।

www.dreamtopper.in

**प्रश्नः 4. प्रश्नानाम् उत्तराणि लिखत–**(प्रश्नों के उत्तर लिखिए–)

(क) चेनम्मायाः सविधे कानि वस्तूनि आसन्?

(ख) पूर्वं प्रायः केन पदार्थेन निर्मितानि वस्तूनि प्राप्यन्ते स्म?

(ग) कानि कानि वस्तूनि पर्यावरणं दूषयन्ति?

(घ) प्लास्टिकस्य मृत्तिकायां लयाभावात् किं भवति?

**उत्तरम्–** (क) चेनम्मायाः सविधे कङ्कतम्, कुण्डलनम् केशबन्धः घटिपट्टिका, कङ्कणम् इति प्लास्टिकनिर्मितानि वस्तूनि आसन्।

(ख) पूर्वं प्रायः कार्पासेन, चर्मणा, लौहेन, लाक्षया मृत्तिकया च निर्मितानि वस्तूनि प्राप्यन्ते स्म।

(ग) प्लास्टिक निर्मितानि स्यूतानि, जलकूप्यः, क्रीडनकानि कंकतानि, कङ्कणानि, केशबन्धादीनि च वस्तूनि पर्यावरणं दूषयन्ति।

(घ) प्लास्टिकस्य मृत्तिकायां लयाभावात् अस्माकं पर्यावरणस्य कृते महती क्षतिः भवति।

**प्रश्नः 5. अधोलिखितानां पदानां लकारं, पुरुषं वचनञ्च लिखत–**(निम्नलिखित पदों के लकार, पुरुष और वचन लिखिए–)

| | पदानि | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| यथा– | सन्ति | अस् | लट्लकारः | प्रथमपुरुषः | बहुवचनम् |
| | कुर्मः | ............ | ............ | ............ | ............ |
| | क्रीणाति | ............ | ............ | ............ | ............ |
| | पश्य | ............ | ............ | ............ | ............ |
| | आगच्छ | ............ | ............ | ............ | ............ |
| | प्रचलिष्यति | ............ | ............ | ............ | ............ |

**उत्तरम्–**

| पदानि | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| कुर्मः | कृ | लट्लकारः | उत्तमपुरुषः | बहुवचनम् |
| क्रीणाति | क्री | लट्लकारः | प्रथमपुरुषः | एकवचनम् |
| पश्य | दृश् | लोट्लकारः | मध्यमपुरुषः | एकवचनम् |
| आगच्छ | आ + गम् | लोट्लकारः | मध्यमपुरुषः | एकवचनम् |
| प्रचलिष्यति | प्र + चल् | लृट्लकारः | प्रथमपुरुषः | एकवचनम् |

**प्रश्नः 6. मञ्जूषातः अङ्कानां कृते पदानि चिनुत–**(मञ्जूषा में से अङ्कों के लिए पद चुनिए–)

| | | | |
|---|---|---|---|
| चतुःपञ्चाशत् | सप्तषष्टिः | द्वासप्ततिः | षडशीतिः |
| चतुर्नवतिः | सप्तनवतिः | पञ्चसप्ततिः | अष्टानवतिः |

67 ............ 86 ............

98 ............ 97 ............

54 ............ 72 ............

94 ............ 75 ............

**उत्तरम्–** 67 सप्तषष्टिः 86 षडशीतिः

98 अष्टानवतिः 97 सप्तनवतिः

54 चतुःपञ्चाशत् 72 द्वासप्ततिः

94 चतुर्नवतिः (चतुर्णवतिः) 75 पञ्चसप्ततिः

## अतिरिक्त-अभ्यासः

www.dreamtopper.in

**(1) पाठाशं पठित्वा अधोदत्तान् प्रश्नान् उत्तरत–(** पाठांश को पढ़कर नीचे दिए गए प्रश्नों के उत्तर दीजिए–)

**कचनार्** – भवतु, बहुधा प्रयुक्तस्य प्लास्टिकस्य दूरगामिनः घातकाः परिणामाः वयं न द्रष्टुं शक्नुमः। प्लास्टिकं कदापि न गलति, न च अपक्षीयते। यथा–अन्यानि वस्तूनि विनश्च मृत्तिकायां विलीयन्ते।

**चेनम्मा** – प्लास्टिकस्य मृत्तिकायां लयाभावात् अस्माकं पर्यावरणस्य कृते महती क्षतिः भवति।

**रिपच्ची** – एकेन पदार्थेन अपरः पदार्थः सृज्यते, अथवा विनष्टं वस्तु मृत्तिकायां मिलति। परं प्लास्टिके इयं प्रक्रिया असम्भवा एव।

**परमिन्दर्** – कल्पयतु, यदि शतं वर्षाणि यावत् प्लास्टिक-निर्मितानां पदार्थानां निर्माणप्रक्रिया पृथिव्यां प्रचलिष्यति तर्हि किं स्यात्? (*सर्वाः सखेदं विमृशन्ति।*)

**I. एकपदेन उत्तरत–**

1. किं कदापि न गलति?
2. कस्य घातकाः परिणामाः भविष्यन्ति?
3. प्लास्टिकं कस्यां न विलीयते?
4. कीदृशानां पदार्थानाम् निर्माणं पर्यावरणा घातकं भविष्यति?

**II. पूर्णवाक्येन उत्तरत–**

1. प्लास्टिके का क्रिया असम्भवा।
2. प्लास्टिकस्य लयाभावात् किं भवति?

**III. भाषिककार्यम्–**

1. 'अन्यानि वस्तूनि विनश्य मृत्तिकायां विलीयन्ते' इति वाक्ये–
   - (i) विलीयन्ते क्रियापदस्य कर्त्ता कः? ________ (अन्यानि, वस्तूनि, मृत्तिकायाम्)
   - (ii) अत्र किं विशेषणाम्? ________ (विनश्य, मृत्तिकायाम्, अन्यानि)
   - (iii) विनश्य = अत्र कः उपसर्गः? कः च प्रत्ययः? ________
   - (iv) मृत्तिकायाम्–अत्र किं विभक्तिं-वचनम्? ________ (द्वितीया एकवचनम्, सप्तमी एकवचनम्, द्वितीया बहुवचनम्)
2. पर्यायं लिखत– (i) धरातले = ________ (ii) वस्तूनि = ________
3. विपर्यायं लिखत– (i) लाभः = ________ (ii) सहर्षम् = ________
4. यथा निर्देशम् रिक्तस्थानामि पूरयत–
   - (i) स्यात् ________ धातुः ________ लकारः ________ पुरुषः ________ वचनम्
   - (ii) ________ अपक्षीयते ________ उपसर्गः।
   - (iii) एकेन ________ विभक्तिः ________ वचनम्।

www.dreamtopper.in

**उत्तरम्–**

**I.** 1. प्लास्टिकम् 2. प्लास्टिकस्य 3. मृत्तिकायाम् 4. प्लास्टिक-निर्मितनाम्

**II.** 1. एकेन पदार्थेन अपरः पदार्थः सृज्यते अथवा विनष्टं वस्तु मृत्तिकायां मिलति–एषा प्रक्रिया प्लास्टिके असम्भवा।

2. प्लास्टिकस्य मृत्तिकायां लयाभावात् अस्माकं पर्यावरणस्य कृते महती क्षतिः भवति।

**III.** 1. (i) वस्तूनि, (ii) अन्यानि, (iii) वि, ल्यप्, (iv) सप्तमी एकवचनम्,

2. (i) पृथिव्याम्, (ii) पदार्थाः

3. (i) क्षतिः (ii) सखेदम्

4. (i) अस्, विधिलिङ्, प्रथमः, एकवचनम्

(ii) अप

(iii) तृतीया, एकवचनम्

**(2) मञ्जूषायाः उचितपदं चित्वा प्रत्येकं रिक्तस्थानं पूरयत–**(मञ्जूषा से उचित पद चुनकर रिक्तस्थान भरिए–)

राजेलिन् – ________, आत्मानमपि पश्य।

चेनम्मा – आम्, ________। पश्यामि एव। मम सविधे ये कङ्कतम्,

________ कुण्डलम्। घटिपट्टिका कङ्कणम् इत्यादीनि सर्वाणि ________
________ किमसि ________?

रिपञ्वी – इदम् ध्यातव्यं यत् एतानि सर्वाणि ________ प्रायः प्लास्टिकेन ________ सन्ति।

कचनार् – पूर्वं तु प्रायः कार्पासेन, चर्मणा, ________ लाक्षया मृत्तिकया ________ वा निर्मितानि वस्तूनि प्राप्यन्ते स्म। अधुना तत् स्थाने प्लास्टिक-निर्मितानि वस्तूनि परितः ________ सन्ति।

| |
|---|
| वस्तूनि, निर्मितानि, विकीर्णानि, वक्तुकामा, हला, कङ्कणम्, केशबन्धः, विराजन्ते, लौहेन, काष्ठेन। |

**उत्तरम्–** हला, आम्, केशबन्धः, विराजन्ते, विराजन्ते वस्तुकामा, वस्तूनि, निर्मितानि, लौहेन, काष्ठेन, विकीर्णानि।

**(3) अङ्कानां समक्षं मञ्जूषातः उचितपदं चित्वा लिखत–**(अङ्कों के सामने मञ्जूषा से उचित पद चुनकर लिखिए–)

| | | |
|---|---|---|
| 47 ............ | 82 ............ | 96 ............ |
| 53 ............ | 60 ............ | 93 ............ |
| 74 ............ | 66 ............ | 55 ............ |

| |
|---|
| त्रिपञ्चाशत्, द्वयशीतिः, त्रिनवतिः, पञ्चपञ्चाशत्, चतुस्सप्ततिः, सप्तचत्वारिंशत्, षट्षष्टिः, षण्णवतिः, षष्टिः |

**उत्तरम्–**

| | | |
|---|---|---|
| 47 सप्तचत्वारिंशत् | 82 द्वयशीतिः | 96 षण्णवतिः |
| 53 त्रिपञ्चाशत् | 60 षष्टिः | 93 त्रिनवतिः |
| 74 चतुस्सप्ततिः | 66 षट्षष्टिः | 55 पञ्चपञ्चाशत् |

**(4) शब्दार्थानां मेलनम् कृत्वा लिखत–**(शब्दों का अर्थ से मिलान कीजिए–)

| | |
|---|---|
| एहि | हानिः |
| गृहीत्वा | समर्थाः भवामः |
| क्षतिः | आवश्यकः |
| विमृशन्ति | आदाय |
| अपेक्षितः | नश्यति |
| अपक्षीयते | आगच्छ |
| शक्नुमः | विचारयन्ति |

**उत्तरम्–**
एहि = आगच्छ
गृहीत्वा = आदाय
क्षतिः = हानिः

www.dreamtopper.in

विमृशन्ति = विचारयन्ति
अपेक्षितः = आवश्यकः
अपक्षीयते = नश्यति
शक्नुमः = समर्थाः भवामः

**(5) यथानिर्देशम् रिक्तस्थानि पूरयत–**(निर्देशानुसार रिक्त स्थान भरिए–)

| | उपसर्गः | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| **(क) 1. आलपन्ति–** | ......... | ......... | ......... | ......... | ......... |
| **2. प्रविशन्ति–** | ......... | ......... | ......... | ......... | ......... |
| **3. पश्य–** | ......... | ......... | ......... | ......... | ......... |
| **4. प्रचलिष्यति–** | ......... | ......... | ......... | ......... | ......... |
| **5. क्रीणाति–** | ......... | ......... | ......... | ......... | ......... |

**उत्तरम्–** (क) 1. आ, लप्, लट्, प्रथमः, बहुवचनम्
2. प्र, विश्, लट्, प्रथमः, बहुवचनम्।
3. दृश्–लोट्, मध्यमः, एकवचनम्।
4. प्रचल्, लृट्, प्रथमः, एकवचनम्।
5. क्री, लट्, प्रथमः, एकवचनम्।

| | लिंगम् | विभक्तिः | वचनम् |
|---|---|---|---|
| **(ख) 1. लयाभावात्–** | | | |
| **2. वस्तूनि–** | ......... | ......... | ......... |
| **3. मसियष्टयः** | ......... | ......... | ......... |
| **4. रक्षणे** | ......... | ......... | ......... |
| **5. सहयोगेन** | ......... | ......... | ......... |

**उत्तरम्–** (ख) 1. पुंल्लिगम्, पञ्चमी, एकवचनम्
2. नपुंसकलिङ्गम्–प्रथमा/द्वितीया, बहुवचनम्
3. स्त्रीलिङ्गम्–प्रथमा, बहुवचनम्
4. नपुंसकलिंगम्–सप्तमी, एकवचनम्
5. पुंल्लिंगम्–तृतीया, एकवचनम्

## बहुविकल्पीयप्रश्नाः

**(1) उचितं विकल्पं चित्वा रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत–**(उचित विकल्प चुनकर रेखांकित पद के आधार पर प्रश्ननिर्माण कीजिए–)

1. अत्र **मृत्तिकया** निर्मितानि वस्तूनि प्राप्यन्ते। (केन, कया, कस्याः)
2. प्लास्टिकेन **पर्यावरणस्य** कृते महती क्षतिः भवति। (कम्, कस्याम्, कस्य)
3. **कलमेषु** मसियष्टयः प्रयुज्यन्ते। (कस्मिन्, कासु, केषु)
4. प्लास्टिक-निर्मितानि वस्तूनि **परितः** विकीर्णानि। (कुतः, कुत्र, कथम्)
5. तया **पञ्चाशत्** मसियष्टयः प्रयुक्ताः। (कति, कतयः, कियत्)

**उत्तरम्–** 1. अत्र **कया** निर्मितानि वस्तूनि प्राप्यन्ते?
2. प्लास्टिकेन **कस्य** कृते महती क्षतिः भवति?
3. मसिष्यष्टयः **केषु** प्रयुज्यन्ते?
4. प्लास्टिक-निर्मितानि वस्तूनि **कुत्र** विकीर्णानि?
5. तया **कति** मसियष्टयः प्रयुक्ताः?

**(2) प्रदत्तविकल्पेभ्यः उचितपदं चित्वा वाक्यपूर्तिं कुरुत–**(दिए गए विकल्पों में से उचित पद चुनकर वाक्यपूर्ति कीजिए–)

1. ______________ वर्षाणि जीवतु भवान्। (शतानि, शतम्, शत)
2. ______________ पदार्थेन अपरः पदार्थः सृज्यते। (एक, एकम्, एकेन)
3. एका छात्रा ______________ मासेषु एकं कलमं क्रीणाति। (त्रि, त्रयः, त्रिषु)
4. वर्षे तु प्रायः ______________ कलमाः विलुप्यन्ते। (बहु, बहूनि, बहवः)
5. ______________ कलमे कति मसियष्टयः प्रयुज्यन्ते? (एके, एकस्य, एकस्मिन्)
6. भवान् किं ______________ अस्ति? (वक्तुकामा, वस्तुकामः, वक्तुकामः)
7. प्रिया कुत्र ______________ अस्ति। (गन्तुकामा, गन्तुकामा, गन्तुकामः)

**उत्तरम्–** 1. शतम्, 2. एकेन, 3. त्रिषु, 4. बहवः, 5. एकस्मिन्, 6. वक्तुकामः, 7. गन्तुकामा।

www.dreamtopper.in